
भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-3

# भारतीयम् अर्थशास्त्रम्



वा० रा० पञ्चमुखी

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशित-ग्रन्थप्रकाशनमाला इति विविधग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृत-भाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिक-संस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **भारतीयम् अर्थशास्त्रम्** इति संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते।

# उपोद्घातः

अधुना 'अर्थशास्त्रम्' इति पदेन प्रायः पाश्चात्यार्थशास्त्रे प्रतिपादितानां प्रमेयानां, तत्र विहितस्य विश्लेषणस्य च सङ्ग्रहः मनसि अवधार्यते। देशस्य आर्थिकविकासमार्गस्य चयनविषये, आर्थिकनीतिविकल्पानां विश्लेषणप्रसङ्गे, अथवा विविधानाम् आर्थिकव्यवहाराणां परस्परसम्बन्धस्य अवगतिविमर्शनप्रसङ्गेषु च अधुनातनाः अर्थशास्त्रज्ञाः प्रायः पाश्चात्यदेशेषु प्रथितयशसाम् अर्थशास्त्रविचक्षणानां प्रमेयान् विचारधाराप्रसरं च आधारत्वेन अवधार्य आत्मनः नीतिप्रबोधनं प्रकुर्वन्ति। अनेकदा प्रसक्तिविवेचनं विनैव पाश्चात्यार्थशास्त्रज्ञेषु आलम्बनं तद्विचारधारादासभावेन विधीयते इति हन्त। एवम् अन्यदेशीयार्थशास्त्रज्ञानां संशोधनप्रबन्धानाम् अध्ययनाध्यापनादिकार्येषु दतावधानानाम् अत्रत्यार्थशास्त्रविमर्शकानां मनोयोगः, भारतदेशे एव प्रगल्भा आर्थिकवैचारिकपरम्परा भारतदेशस्य सामाजिकराजकीयसांस्कृतिकपरिसरस्य अत्यन्तम् समुचिता सती चकास्ति इत्यात्मकाम् अवगतिं नैव गृह्णाति इत्यपि शोचनीयो विषयः।

भारतदेशे स्वातन्त्र्यप्राप्तेः पूर्वं राजकीयस्वातन्त्र्योद्देश्यं प्रसक्तान्दोलनप्रसङ्गे एव देशे जनजागृतिप्रचोदनकर्मणि नेतृत्वस्थानं गृहीतवन्तः अनेके धुरीणाः भारतदेशस्य आर्थिकविकासोद्देशमनुलक्ष्यापि विशिष्टविचारधाराः पुरतः कृतवन्तः। स्वातन्त्र्यप्राप्तेः पश्चात्तनकाले अपि भारतदेशे अर्थशास्त्रसन्बद्धाः अनेके वैशिष्ट्यसपन्नाः वैचारिकप्रमेयाः प्रतिपादिताः वर्तन्ते। तथा च अस्माकं वेदेतिहासपुराणादिशास्त्रग्रन्थेष्वपि अधुनातनकालस्यापि औचित्यं दधन्तः आर्थिकप्रमेयाः मौलिकविचाराः च प्रासङ्गिकशैल्या अनुशासिताः दरीदृश्यन्ते।

अधुना सन्दृब्धस्य 'भारतीयम् अर्थशास्त्रम्' इति ग्रन्थस्य अनेकोद्देशेषु अन्यतमः उद्देशः एवं वर्तते भारतीयवैचारिकपरम्परायां प्रतिपादितानाम् अर्थशास्त्रसम्बद्धानां विचाराणां व्यक्तरूपेण प्रकाशनम्। यद्यपि

## प्रथमं प्रकरणम्

# शास्त्रेषु अर्थशास्त्रविचाराः

भारतीयार्थशास्त्रविचाराणां भित्तिमूलं वेदपुराणेतिहासादिप्राचीनशास्त्रग्रन्थेषु संप्रतिष्ठितम् इति कथनं नैव अतिशयोक्तिः। वेदपुराणादिशास्त्रग्रन्थाः मानवस्य न केवलम् आध्यात्मिकोद्धारमार्गोपायान् प्रतिपादयन्ति प्रत्युत लौकिकप्रपञ्चे कथं वा सुखशान्तिसमृद्धीनां प्राप्तिः भूयादिति विषयमधिकृत्यापि मूलभूततत्वानि, व्यवहारीकरणोपायांश्च निर्दिशन्तीति शास्त्रज्ञानां मतम् अत्र अवगाहनार्हताम् अधिगच्छति। कथम् आध्यात्मिकग्रन्थे लौकिकविषयानधिकृत्य चर्चा सङ्गता भवेदिति प्रश्नः स्वाभाविकप्रज्ञया उद्‌भवति। मूलतः एतादृशप्रश्नस्य प्रसक्तिः शास्त्रग्रन्थानां विषयप्रसरस्य, विस्तारस्य च अज्ञानेनैव प्रचोदिता इति कथनीयं स्यात्। भारतीयशास्त्रग्रन्थाः ज्ञानभाण्डागारा विद्यन्ते। अर्वाचीनसंशोधनकारैः एवम् अभिप्रेतं यत् भारतीयशास्त्रग्रन्थेषु भौतिकविज्ञानस्यापि अनेके आधुनिकप्रमेयाः क्वचित् प्रत्यक्षरीत्या क्वचित् अप्रत्यक्षरीत्या प्रतिपादिताः वर्तन्ते इति। इदं मतम् अनेकोदाहरणानां विशदीकरणेन स्पष्टीक्रियते। रसायननिर्माणसूत्रं, खनिजपदार्थानां संशोध्य शुद्धीकृतधातोः अवधारणं, परमाणुतत्वानि, अन्तरिक्षविज्ञानप्रमेयाः, गणितशास्त्रम्, खगोलशास्त्रं, इत्यादयः आधुनिकविज्ञानप्रपञ्चस्य अनेके विचाराः भारतीयशास्त्रग्रन्थेषु पुरस्कृताः विद्यन्ते इत्येतत् प्राचीनशास्त्रकाराणां सर्वतोमुखीनविदग्धतां प्रदर्शयति।

प्रकृतं, प्राचीनशास्त्रग्रन्थेषु के के अर्थशास्त्रसम्बद्धविषयाः पुरस्कृताः इति विषयमधिकृत्य विस्तरेण विमर्शः विधातव्यः। भारतीयशास्त्रग्रन्थेषु प्रतिपादि-

## द्वितीयं प्रकरणम्

# जवाहरलालनेहरूमहाभागस्य विचाराः

अधुना भारतीयार्थिकस्थितिः विविधाभिः समस्याभिः प्रक्षुब्धा वर्तते। एकतः राजकीयव्यवस्थायाः अनिश्चितता अशान्तिश्च। अन्यतः सर्वकारस्य बहु-कालात् प्रचलिता आयव्यययोः असमतोलता। इतोऽप्यधिकतः बाह्यजगतः प्रचोदिताः अनेकविधाः असमतोलताकारकाः घटनाः। नूनं गमनार्हमेतत् यत् भारत-देशे गतचत्वारिंशद्वत्सरेभ्यः पञ्चवार्षिकयोजनाक्रमपरिपोषिताः अभिवृद्धिकार्य-क्रमाः देशस्य आर्थिकबलम् अनितरसाधारणवैशिष्ट्यरीत्या दृढीकृतवन्तः। नवतितमदशके आपतस्यमानानाम् आर्थिकाह्वानानां विश्लेषणम् इतः पूर्वतमदशकेषु सम्पादितम् आर्थिकविधानस्य परिवर्तनम् अनुलक्ष्य तथा च अशीतितमदशकस्य उत्तरार्धे आपन्नां सङ्कटपरिस्थितिं च मनसि निधाय करणीयम्।

विदितचरमेव यत् भारतदेशः राजकीयस्वातन्त्र्यसाधनानन्तरम् आर्थिका-भिवृद्धेः ध्येयं प्राथम्येन अङ्गीचकार। देशस्य कोट्यधिकप्रजानां अतिशोचनीयं तीव्रतमं दारिद्र्यं, असङ्ख्यजनानां निरुद्योगता, निर्विद्यतासमस्या, यन्त्रपरिभाषायाः अतिपुरातनता, कृष्युत्पादनस्य अपर्याप्तता, आयातनिर्यातयोः असमतोलता, अन्ता-राष्ट्रियधनकोशस्य अपर्याप्तिसङ्कटम् इत्यादयः आर्थिकसमस्याः महाभूतानि इव देशं परिगृहीतवत्यः आग्न्। स्वतन्त्रभारतदेशस्य प्रप्रथमप्रधानमन्त्रिपदधुरं सन्धरन् श्रीमान् पण्डितजवाहरलालनेहरूमहाभागः देशस्य आर्थिकाभिवृद्धिं त्वरितगत्या सर्वतोमुखेन साधयितुकामः पञ्चवार्षिकयोजनापरिपाटीं परिकल्पितवान्। जटिल-समस्यानां परिहारार्थं कीदृशो आर्थिकाभिवृद्धिपथः अनुसरणीयः इत्ययम् अर्थ-




योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

# राष्ट्रिय-संस्कृत-संस्थानम्

**मानितविश्वविद्यालयः**

**नवदेहली**